
# तृतीयः पाठः । किं मिथ्या ? किं वास्तवम् ?

आधुनिकं तन्त्रज्ञानं मानवस्य कृते भौतिकविकासस्य विस्तीर्णं क्षेत्रम् उद्घाटयति इति तु सत्यमेव । तथापि तन्त्रज्ञानसाधनानाम् अत्यधिकोऽपयोगः नूतनान् प्रश्नान्, विघ्नान् सामाजिकसमस्याः च निर्माति । मिथ्या तथा च वास्तवम् एतयोः मध्ये भेदः ज्ञातव्यः अस्माभिः। आधुनिककालस्य इयमेवावश्यकता । – **लेखिका :– श्रीमती मुग्धा रिसबूड ।**




(त्रयोदशवर्षीया तनया सुखासन्दे उपविश्य एकेन हस्तेन कुर्कुरिकां खादति। अपरेण हस्तेन चलभाषं चालयति। तदानीं द्वारघण्टिकाम् आकर्ण्य माता द्वारम् उद्घाटयति। तनयायाः सख्यौ द्वारे एव स्थित्वा ताम् आह्वयतः।)



श्रुतिः – तनये, सत्वरं क्रीडनाय आगच्छ, बहिः खेलामः।

तनया – अहं गृहे एव खेलामि।

राजसी – किं खेलसि ?

तनया – (चलभाषं दर्शयित्वा) एतस्मिन् चलभाषे यष्टिकन्दुकक्रीडा, पादकन्दुकक्रीडा, वाहनक्रीडा, पत्रक्रीडा, चतुरङ्गक्रीडा, इत्यादयः सर्वाः क्रीडाः सन्ति। क्रीडाङ्गणं गत्वा खेलनस्य आवश्यकता एव नास्ति। अहं न आगच्छामि। (सख्यौ क्रीडार्थं निर्गच्छतः। माता पाकगृहं गच्छति। तनया चलभाषे युद्धक्रीडायां मग्ना ।)

तनया – (स्वगतम्) एतस्यां क्रीडायां एषः सैनिकः मृतः अपरः च मारणीयः। ..... सर्वे सैनिकाः मृताः। हेऽऽ .....जितं मया। खेलः समाप्तः। (तनया पाकगृहं गच्छति।) अम्ब, बुभुक्षिता अस्मि।

माता – तनये, मम चलभाषे एतानि छायाचित्राणि पश्य। (तनया खाद्यपदार्थानां छायाचित्राणि पश्यति।)

तनया – मातः, पिझ्झा, पावभाजी, सिजलर्स इत्यादीनि खाद्यानि दृष्ट्वा लालायितं मे मुखम्। कृपया किमपि यच्छतु।

माता – चलभाषे दृष्टवती खलु ? अधुना खाद्यपदार्थानाम् आवश्यकता एव नास्ति। अहं न यच्छामि।

तनया – चलभाषे भोजनं दृष्ट्वा बुभुक्षा शान्ता कथं भवेत् ?

माता – यदि एतत् सत्यं, तर्हि कथं न जानासि यत् चलभाषेण क्रीडित्वा व्यायामः न भवति? स्वास्थ्यरक्षणं न भवति ?

तनया – परं मातः, मह्यं रोचते तत् चलभाषेण क्रीडनम्।

माता – तनये, यद् यद् रोचते तत् तत् सर्वं स्वास्थ्यकरं, हितकरम्, आरोग्यपूर्णं न भवति। सम्यक् क्रीडा, पौष्टिकम् अन्नं, रात्रौ निद्रा आरोग्याय भवति । चलभाषे आभासात्मकं विश्वं न वास्तवम्।

तनया – तर्हि किं चलभाषस्य उपयोगः एव न करणीयः ।

माता – तथा न । आवश्यकतानुसारं योग्यः उपयोगः करणीयः एव । किन्तु अति सर्वत्र वर्जयेत् ।

तनया – आम् मातः। इतः परं पुनः चलभाषस्य योग्यम् उपयोगं करोमि।

## भाषाभ्यास:



**१. एकवाक्येन उत्तरत।**

अ. चलभाषे का: क्रीडा: सन्ति ?

आ. चलभाषे कीदृशं विश्वम् ?

इ. किं किं दृष्ट्वा तनयाया: मुखं लालायितम् ?

ई. स्वास्थ्यरक्षणाय किं किम् आवश्यकम् ?

**२. माध्यमभाषया उत्तरत।** अ. माता तनयाया: विचारपरिवर्तनं कथं करोति ?

आ. 'किं मिथ्या ? किं वास्तवम् ?' इति पाठस्य तात्पर्यं माध्यमभाषया लिखत ?

**३. अ) सन्धिविग्रहं कुरुत।** क) तदेव = ____ + एव। ख) नास्ति = न + ____।

**आ) कालवचनपरिवर्तनं कुरुत।**

१) अहं न आगच्छामि। (लङ्लकारे परिवर्तयत।)

२) बुभुक्षिता अस्मि। (बहुवचने परिवर्तयत।)

३) सख्यौ क्रीडार्थं प्रतिगच्छत:। (एकवचने लिखत।)

४) एतानि छायाचित्राणि पश्य। (उत्तमपुरुषे परिवर्तयत।)

**इ) शब्दस्य वर्णविग्रहं कुरुत।** १) द्वारम् २) स्वास्थ्यम् ३) बुभुक्षा ४) पौष्टिकम्

**ई) मेलनं कुरुत।**

| | |
|---|---|
| विशेष्यम् | १. बुभुक्षा २. सैनिका: ३. खेल: ४. अन्नम् ५. विश्वम् |
| विशेषणम् | १. पौष्टिकम् २. शान्ता ३. आभासात्मकम् ४. समाप्त: ५. मृता: |

**उ) पाठात् त्वान्त-ल्यबन्त-अव्ययानि चिनुत लिखत च।**

**४. अ) समानार्थकशब्दं चिनुत।** भट:, क्रीडा, जननी, क्षुधा, स्वाप:

**आ) विरुद्धार्थकशब्दं लिखत।** समाप्त:, स्वास्थ्यम्, आभासात्मकम्, मृत:



### हसत नन्दत !

**सन्धिरपि विनोदाय...**

पुरा महाराष्ट्रेषु प्रजाहितदक्ष: कोऽपि नृप: आसीत् । तस्य महिषी संस्कृतभाषाप्रवीणा विदुषी च। एकदा तौ जलविहारार्थं किञ्चित् रम्यं जलाशयमगच्छताम्। जलक्रीडायां मग्न: नृपति: महिष्यां जलबिन्दून् क्षेप्तुं प्रारभत। राज्ञीं शैत्यम् अबाधत। अत: सा लज्जया नृपं संस्कृतभाषयैवावदत्, **"मोदकैस्ताडय माम्।"** तस्या: तद् वचनं श्रुत्वा चकित: राजा सेवकं सुवर्णस्थाल्यां मोदकानानेतुमादिशत्। यदा स: तैर्लघुमधुरगोलकै: राज्ञीं ताडयितुमैच्छत् तदा सा स्मितपूर्वकमगदत्, "भो राजन्, शैत्यं मां बाधेत इति चिन्तयित्वा **'मा उदकै: ताडय माम्'**, जलबिन्दुभि: (उदकै:) मा त्रासय, इति वक्तुकामासम्।" भूपतिरपि उच्चै: हसित्वा अभणत्, "मोदकशब्दश्रवणेन अन्यथा गृहीतं मया। तेन अयं परिहासप्रसङ्ग: उद्भूत:।"